# 'कविकुल गुरू कालिदासः'

डॉ0 वीरेन्द्र कुमार 'सुमन *

''कविकुलगुरू कालिदासो विलासः''[1]

**Sanskrit is the greatest, Perfect and the most wonderful language in the world.**

साहित्यषु संस्कृत साहित्यः श्रेष्ठः अस्ति। संस्कृत भाषायाः महत्वं सर्वैः स्वीकृतम् अस्ति। इयं सर्वासां भाषाणां जननी। अस्यां भाषायां भारतीय संस्कृति वर्णिता अस्ति। भारतस्य संस्कृति प्राचीनतमा अस्ति। संस्कृति संस्कृतश्च 'सम' उपसर्गात् कृ धातोः निष्पन्नः शब्दः। संस्कृतस्य गौरवम् आचार्यवरो दण्डी इत्थं स्वयमेव उक्तम्–

''संस्कृतं नाम दैवी वाग्न्वाख्याता महर्षिमिः।''

इयं देववाणी अस्ति। इयं सर्वासु भाषासु मुख्या मधुरा दिव्या प्राचीनतमा च। विद्यमानेषु निखिलेषु साहित्येषु अस्य साहित्यं सुविपुलं श्रेष्ठं सुसम्पन्नञचास्ति। तत्र ग्रंथानां संख्या पंचाशत सहस्राद अपि अधिका वर्तते।

वैदिक साहित्ये वेद–वेदांग संहितारण्यक ब्राह्मण–सूत्राणि–उपनिषद् प्राति शाख्यानि च संस्कृते लिखितानि। सर्वाणि पुराणानि संस्कृत भाषायां लिखितानि सन्ति। स्मृत्यादि सर्वे धर्म ग्रन्थाः दर्शनशास्त्राणि च संस्कृत एव वर्तन्ते। अर्थशास्त्र, नीतिशास्त्र, सुभाषितानि, हितोपदेषानि चापि संस्कृते एव लिखितानि। आदिकाव्य रामायणः, आर्षकाव्य, महाभारतश्च अस्यां भाषायाम् अस्ति। किं बहुना आरोग्य साधनानि आयुर्वेदाः अपि संस्कृत भाषायामेव विद्यते। उक्तं च–

संस्कृते संस्कृतिज्ञया, संस्कृते सकला कला।
संस्कृते सकलं ज्ञानं, संस्कृते किं न विद्यते।।

इयं भाषा सर्वेषां प्राणीनां कल्याणं कामना करोति–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्न्तु, मा कश्चित् दुःखभागभवेत्।।[2]

अस्माकं प्राचीना ऋषयः स्वार्थं विहाय सर्वदा विश्व कल्याणमेव चिन्तयत् समस्तं जगतं तेषां कृते स्वकीयं कुटुम्बमिव आसीत्।

---

प्रवक्ता, नेशनल इण्टर कालेज, हरैंया–बस्ती



अयं निजः परोवेति गणनां लघुचेतसाम्।
उदार चरितानां तु वसुधैव कुटुम्बकम्।।[3]

तैतीरीयोपनिषद उपदिषति यत् = मातृदेवो भव,
पितृदेवो भव, आचार्य देवो भव अतिथि देवो भव।

एतादृशा समृद्धाः संस्कृतभाषायां अनेकानि विद्वद्मिः कविभिः स्व–स्व काव्यानि रचितानि सन्ति। तेषु कविताकामिनी कान्तः कविकुलललामभूतः कालिदासः श्रेष्ठः। अयं कविकविनां मुकुटमणिरस्ति। सः संस्कृत साहित्याकाशे प्रकाशते।

तस्य जन्म कस्मिन् प्रदेशे, काले, कुले चाभवत्, किञचासीत् तज्जन्मवृत्तम इति। सर्वामधुनापि विवादकोटिं नातिक्रमति। यतोहि कालिदासः अपि आत्मज्ञापने धृत मौनः एव अस्ति।

कालिदासः विक्रमादित्यस्य नव संमारत्नेषु मुख्यतमः– धन्वन्तरिक्षपणकामर सिंह शंकु वैतालभट्ट घट कर्पर कालिदासाः। ख्यातो वराहमिहिरो नृपतेः समायां रत्नानि वैवररूचिर्नव विक्रमस्यां।

केचिन्मन्यते यत् कालिदासः विक्रमादित्य उपाधिधारिणो द्वितीय चन्द्रगुप्तस्य समकालिकः आसीत्। शुंगवंशीय राजा अग्निमित्रोऽपि विक्रमादित्योपाधि धृतवान्। विक्रमस्य स्थिति कालः खीष्टाब्दात् प्रागासीत्। (57BC)। स एव स्थिति कालः कवेरपि सिध्यति। कालिदासस्य जन्मस्थाविषयेऽपि नैकमत्यमस्ति। उज्जयिनीं प्रति कवेः सातिशयोऽनुरागः एतन्मतं पुष्पाति यत् सः उज्जयिन्यां लब्धजन्मासीत्।

तस्य कृतिषु वर्णाश्रम धर्म व्यवस्थायाः प्रतिपादनेन एतद् अनुमीयते यत् तस्य जन्म विप्रकुले अभवत्। भावनया सः शिवभक्तः आसीत् तथापि तस्य धर्मभावनायां भनागपि सङ्कीर्णता नासीत्। शिवभक्तोऽपि तत रघुवंषो स रामं प्रति स्वभक्ति भाव उदारमनसा प्रकटयति। कालिदासस्य जीवनवृत्तं सर्वथा अज्ञानान्धकाराच्छन्नमस्ति। तद्विषयिका जनश्रुतयः सन्ति यत् स्व प्रारम्भिके जीवने सः महान् मुर्खः आसीत् तस्य विवाहः विद्योत्माया सहअभवत्। पत्न्या अपमानितो भूत्वा सः गृहात् निर्गतः इत्यपि जनश्रुतयः। आगते गृहे 'अस्ति कश्चिद् वाग्विशेषः?' इति पत्न्याः वाक्यस्य प्रत्येकं शब्देन त्रीणि काव्यानि रचितानि। कालिदासस्य ज्ञातकृतिषु रघुवंशं, कुमारसंमवं च तस्य महाकाव्यद्वयं मेघदूतम्, ऋतुसंहारष्च द्वे खण्डकाव्ये, मालविकाग्निमित्रं विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलं च त्रीणि नाटकानि सन्ति।

कलिदासस्य प्रथम कृति ऋतुसंहारः अस्ति। ऋतुसंहारे धरावाहिक रूपेण निदाध, वर्षा, शरत् शिशिर, हेमन्त, वसन्तश्च इति शण्णामृतूनां वर्णनमस्ति। मेघदूते यक्ष–यक्षिण्योः वियोगमाश्रित्य विप्रलम्भ श्रृंगारस्य पूर्णपरिपाको दृश्यतो। एकोनविंशति सर्गे वर्णितः रघुवंश महाकाव्यं कविकुल गुरोः सर्वातिशायिनी कृतिरस्ति। अस्मिन्

महाकाव्ये राजा दिलीपाद् आरम्य अग्निवर्णा पर्यन्तम् इक्ष्वाकु वंशावतंसभूतानां नृपतीनामवदाननिरूपणमस्ति। अष्टादश सर्गात्मकं कुमारसंभवे भगवान् शिवेन सह भगवती पार्वत्याः विवाहोपरान्तः कार्तिकेयस्य जन्म पश्चात् तारकासूरस्य वधः, जगतश्च कल्याणं वर्णनमस्ति। पञ्चाङ्कात्मके मालविकाग्निमित्रनाटके अग्निमित्रस्य, प्रद्योतचण्डस्य पुत्री मालविकायाः च प्रेमाख्यानमस्ति। पंचाकात्मके विक्रमोर्वशीये पुरूरवसः उर्वश्याश्च प्रेमकथा वर्णिता। शाकुन्तलम् अस्य कवेः सर्वश्रेष्ठा नाट्यकृतिरस्ति। सप्तांकात्मक अस्मिन् नाटके मेनकया प्रसूतोज्झितायाः शकुन्तैश्च पोशितायाः तदनु कण्वेन पालितायाः शकुन्तलायाः दुश्यन्तेन सहोद्वाहस्य कथा वर्णितास्ति। शाकुन्तल विषये भणितिः–

'काण्येषु नाटकं रम्यं तत्र रम्या शकुन्तला'

अस्मिन् नाटके प्रकृतिरपि स्वजडत्वं विहाय सर्वत्रमानव सहचरीवाचरति। मेघे वाह्यन्तः प्रकृत्योः मर्मस्पृग्वर्णनमस्ति। कवि दृष्टया मेघः धूमज्योतिस्सलिलमरूतां सन्निपातो न भूत्वा एकः संवेदनशीलः मानवोपमः प्राणी अस्ति। शाकुन्तले सूर्यः अरूणोदयवेलायां स्वप्रियतमायाः नलिन्याः तुषार बिन्दुरूपाणि अश्रूणि स्वकरैः परिमृजति।

कालिदासस्य काव्येषु अङ्गीरसः श्रृंगारोऽस्ति। मुख्यतः प्रसाद गुण गुम्फिता तस्य काव्योत्कर्षे साहाय्यं कुरूतः। वैदर्मी रीतिः तु कालिदासस्य वाग्वश्येव सर्वत्रानुवर्तते। अलंकार योजनायां सः कवि अद्वितीयः। उपमा प्रयोगे स अतिकुशलः अस्ति। सः उपमा शिरोमणि कथ्यते। उपमातु अस्य निसर्गसिद्वा प्रेयसीव प्रतीयते। साहित्य दर्पणकारेण विश्वनाथेन उक्तम्–''साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः विहाय साम्यमात्र चेद् उच्यते एकस्मिन् वाक्ये तर्हि सा उपमा।'' रघुवंशे तु उपमाप्रयोगः सर्वाधिक्यं भजते। अस्य महाकाव्यस्य प्रारम्भेऽपि उपमालंकारेणैव संजातोऽस्ति –

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपतये।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ।।[4]

अत्र मातृपितृरूपयोः पार्वती–शिवयोः वागर्थद्वन्द्वेन सादृष्यमस्ति । निम्न श्लोकस्योपरि कालिदासः– 'दीपशिखा' इति उपाधिनालङ्कृतः

सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे,
विवर्णभावं स स भूमिपालः।।[5]

अपि च,

श्रुते रिवार्थ स्मृतिरन्वगच्छत्''[6]
कालिदासः नवयौवना प्रकृत्या अपि उपमां गृहणान्ति।



शकुन्तलायाः कमनीय कलेवरम् उपवर्णयन् महाकविराह–
अधरः किसलयरागः कोमल विटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमंगेषु संनद्वम्।।[7]

अपि च–

अनाघ्रातं पुष्पं किसलयमलूनं कररूहै,
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं,
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।।[8]

आभिज्ञानशाकुन्तलन्तु क्षणे–क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः इति।

दिशानुसारं श्रेष्ठमेव नाटकं वर्तते।

अतः नूनमेव कालिदासः उपमानिरूपेण सर्वोतत्कृष्टो नात्र संशयः। अतएवोच्यते– 'उपमा कारिमदासस्य'।

इत्थं कविकालिदासः स्वकीयोपमा सम्पतिभिः कस्य सचेतसः चेतः न आवर्जयति। तस्य काव्य सौन्दर्यं प्रेक्षं–प्रेक्षं सहृदयाः सुधियः तस्य कला कौशलं प्रशसन्त्येव। तस्य सूक्तयः मंजर्यः इव चेतोहराः सन्ति। यथोक्तं महाकविनां बाणभट्टेन–

निर्गतासु न वा कस्य कालिदासस्य सूक्तिसु ।
प्रीतिमधुरसान्द्रासु, मंजरीष्विव जायते ।।[9]

प्रो0 लैसेन महोदयेन कालिदासस्य महत्वं वर्णितः– The brightest star in the firmament of Indian poetry,

महर्षि विवेकानन्दः कालिदासं विश्वज्ञानिनं कथयन्न लिखितवान्ः– Like the dew tha t falls unshaken but brings into blossom the fairies of roses such has been the contribution of Kalidas in the world.

विनय सरकारः अपि कथयति– "Stands Asia who does not understand Kalidas the sprit of India".

एकः जर्मन विद्वान् कालिदासस्य गौरवं वर्णनं कुर्वन् कथयति यत्– "In Kalïdas we are introduced at once to some thing New which no one hit upon before some thing incomparable, great and in during for all time."

अन्यश्च–

पुराकवीनां गणना प्रसंगो, कनिष्ठिकाधिष्ठित कालिदासः।
अद्यापि तत तुल्य कवेरभावादनामिका सार्थवती बमूव।।[10]

सन्दर्भः–

1. प्रसन्नराघवः – 1/22
2. ऋग्वेद्
3. हितोपदेशः – मित्रलाभः 71
4. रघुवंशः– 1/1
5. रघु0 – 6/67
6. रघु0 – 2/2
7. अभिज्ञान – 1/22
8. अभिज्ञान – 2/10
9. हर्षचरितम् – 1/16
10. कुवलयानन्द (अप्पयदीक्षित)– 164

*********

# नागार्जुनः की दृष्टि में नारी की शोचनीय स्थिति

डॉ0 अनिता कुमारी, सिवान*

भारतीय संस्कृति, समाज तथा साहित्य में नारी का स्थान बड़ा ही सम्माननीय माना गया है। प्राचीन साहित्य में इसके अनेक उदाहरणों के होते हुए भी वास्तविक रूप से आज के भारतीय समाज में पुरूष की सहधार्मिणी होते हुए भी वह पति की अनुगामिनी और उसकी परछाई मात्र बन कर रह गई है। उसकी दुर्दशा की ओर समाज सुधारकों एवं देश के नीति निर्धारकों का ध्यान शायद ही कभी गया हो। पुरूष को बहुविवाह, सौंदर्य लोलुपता की ताक झांक, परकीया प्रेम आदि सब बातों के लिए खुली छूट दे रखी है पुरूष प्रधान समाज ने, किन्तु इसके विपरीत भारतीय नारी आज भी अशिक्षा अन्ध विश्वास तथा कुल मर्यादा के नाम पर जीवन के हर क्षेत्र में आज भी पिछ़डी हुई, दकियानूसी रूढ़ियों के बन्धक में जकड़ी हुई पिंजरबद्ध पक्षिणी की भांति छटपटा रही है। नागार्जुन ने पुरूष की अर्द्धांगिनी और जननी की पीड़ा को मिथिलॉचल में बहुत निकट से देखा है। उन्हे पौराणिक पात्रों में शबरी, अहल्या, सीता, सूपनखा, और रेणुका की दुर्दशा, उन पर पुरूष समाज द्वारा ढाए गए जुल्मों की याद हैं, तो साथ ही बहुविवाद, सती प्रथा और दहेज की बलिवेदी पर चढ़ती आज के युग की नवयुवतियों की करूण कथा भी कहीं गहरे में मर्मान्तक वेदना पहुँचाती हैं। माता पिता और समाज द्वारा धर्म के नाम पर बलिदान की बकरी बननेवाली नवयुवती को भिक्षुणी के वेश में देखकर उनका मन उसके हृदयगत भावों से मानों तादात्मय स्थापित कराता हैं। तब नागार्जुन मनोवैज्ञानिक अन्दाज में उसकी मनोव्यथा का शब्द चित्र बड़े ही प्रभावशाली ढ़ंग से प्रस्तुत करते है।

महायान हीन यान सभी मैं जान गई
किन्तु नहीं जान सकी–
मानव का मानवी का सहजयान क्या है!
x x x x x x
किन्तु कौन पूछेगा मुझे कल परसों?
गलित होगा यौवन जब!